ಇವೆರಡು ಪ್ರತ್ಯಯಗಳೂ ಭೂತಕಾಲದಲ್ಲಿ ಧಾತುಗಳಮೇಲೆ ಬರುತ್ತವೆ. ಇವುಗಳನ್ನು ಹೊಂದಿದ ಶಬ್ದಗಳು ಕ್ರಿಯಾಪದಗಳ ಅರ್ಥವನ್ನು ಬೋಧಿಸುತ್ತಿದ್ದರೂ, ಪ್ರಾತಿಪದಿಕಗಳೆನಿಸಿಕೊಂಡು ಎಲ್ಲಾ ವಚನ, ವಿಭಕ್ತಿಗಳನ್ನೂ ಹೊಂದುತ್ತವೆ. **क्तवतु** ಪ್ರತ್ಯಯವು ಕರ್ತ್ರರ್ಥದಲ್ಲಿ ಬಂದು ಕರ್ತೃವಿಗೆ ವಿಶೇಷಣವಾಗಿರುತ್ತದೆ. **क्त** ಪ್ರತ್ಯಯವು ಗತ್ಯರ್ಥಕ ಮತ್ತು ಅಕರ್ಮಕ ಧಾತುಗಳಮೇಲೆ ಕರ್ತ್ರರ್ಥದಲ್ಲಿಯೂ ಸಕರ್ಮಕ ಧಾತುಗಳ ಮೇಲೆ ಕರ್ಮಾರ್ಥದಲ್ಲಿಯೂ ಬರುತ್ತದೆ. ಕರ್ಮಾರ್ಥದಲ್ಲಿ **क्त** ಪ್ರತ್ಯಯದ ಪ್ರಯೋಗವನ್ನು ಮುಂದಿನ ಪಾಠದಲ್ಲಿ ವಿವರಿಸುತ್ತೇವೆ. ಈ ಪ್ರತ್ಯಯಗಳನ್ನು ಹೊಂದಿದ ಶಬ್ದಗಳು ವಿಶೇಷಣಗಳಾಗಿ ವಿಶೇಷ್ಯದ ಲಿಂಗ, ವಚನ ಮತ್ತು ವಿಭಕ್ತಿಗಳನ್ನು ಹೊಂದುತ್ತವೆ. **क्तवतु**

---

1. मृगयां कर्तुम् 2. राजपुरुषान् 3. विपणिम्
4. असकृत्

ಪ್ರತ್ಯಯದಲ್ಲಿ तवत् ಎಂಬ ಭಾಗವೂ, क्त ಪ್ರತ್ಯಯದಲ್ಲಿ त ಎಂಬ ಭಾಗವೂ ಉಳಿಯುತ್ತವೆ. ಬೇರೆ ಬೇರೆ ಲಿಂಗಗಳಲ್ಲಿ ಈ ಶಬ್ದಗಳು ರೂಪಾಂತರ ಹೊಂದುವುದನ್ನು ಕೆಳಗೆ ಗಮನಿಸಿರಿ.

क्तवतुप्रत्ययः

कृ + तवत् = कृतवान् = ಮಾಡಿದನು पठ् + तवत् = पठितवान् = ಓದಿದನು गम् + तवत् = गतवान् = ಹೋದನು	ಪುಲ್ಲಿಂಗ
कृ + तवत् = कृतवती = ಮಾಡಿದಳು पठ् + तवत् = पठितवती = ಓದಿದಳು गम् + तवत् = गतवती = ಹೋದಳು	ಸ್ತ್ರೀಲಿಂಗ
कृ + तवत् = कृतवत् = ಮಾಡಿತು पठ् + तवत् + पठितवत् = ಓದಿತು गम् + तवत् = गतवत् = ಹೋಯಿತು	ನಪುಂಸಕಲಿಂಗ

क्तप्रत्ययः

गम् + त = गता = ಹೋದನು भी + त = भीतः = ಹೆದರಿದನು	ಪುಲ್ಲಿಂಗ
गम् + त = गता = ಹೋದಳು भी + त = भीता = ಹೆದರಿದಳು	ಸ್ತ್ರೀಲಿಂಗ
गम् + त = गतम् = ಹೋಯಿತು भी + त = भीतम् = ಹೆದರಿತು	ನಪುಂಸಕಲಿಂಗ

अभ्यासः २७

कर्णाटभाषया परिवर्तयत—

१. वयमद्य क्रीडाङ्गणे कन्दुकेन क्रीडितवन्तः। २. पार्वती शिवं दृष्ट्वा लज्जया चलितवती। ३. हरिणानां यूथं बालतृणानि भक्षयित्वा नन्दितवत्। ४. सा बाला मातुः पुरतः रघुवंशं पठितवती। ५. तं वानरं वीक्ष्य रामो हसितवान्। ६. योधाः शत्रून् विजित्य राजधानीं रक्षितवन्तः। ७. सीता वृक्षे उपविष्टं हनूमन्तं दृष्टवती। ८. घटस्य रन्ध्रात् क्षीरं स्रुतवत्। ९. ध्रुवः एकेन पादेन स्थित्वा महाविष्णुं चिरं ध्यातवान्। १०. नार्यः संक्रान्तिकाले कावेर्यां स्नातवत्यः। ११. रजकः क्षालयितुं वस्त्राणि गृहीत्वा गतः। १२. अमुं धनिकं वितरणशीलं मत्वा याचकाः श्रिताः।

अभ्यासः २८

संस्कृतभाषया परिवर्तयत—

೧. ಉಪಾಧ್ಯಾಯರು ಕುರ್ಚಿಯಮೇಲೆ ಕುಳಿತುಕೊಂಡರು. ೨. ಕೃಷ್ಣನು ಬೆರಳಲ್ಲಿ ಉಂಗುರವನ್ನು[1] ಧರಿಸಿದನು ೩. ನಾನು ಈ ಅಂಗಡಿಯಲ್ಲಿ ತಾಮ್ರದ ಪಾತ್ರೆಗಳನ್ನು ಕೊಂಡುಕೊಂಡೆನು. ೪. ಅವಳು ಗೋಧಿಹಿಟ್ಟಿನಿಂದ ಹೋಳಿಗೆಯನ್ನು[2] ಮಾಡಿದಳು. ೫. ಶಾರದೆಯು ರಾಮನ ತಂಗಿಯನ್ನು ಊಟಕ್ಕೆ ಕರೆದಳು. ೬. ಹೂವುಗಳು ಆಕಾಶದಿಂದ ಶ್ರೀರಾಮನ ತಲೆಯಮೇಲೆ ಬಿದ್ದವು. ೭. ಕಳೆದ ವರ್ಷ ನಾಲ್ಕನೆಯ ತರಗತಿಯಲ್ಲಿ ಇಪ್ಪತ್ತು ವಿದ್ಯಾರ್ಥಿಗಳು ಓದಿದರು. ೮. ವಿಷ್ಣುವು ಪ್ರತ್ಯಕ್ಷನಾಗಿ ಗಜೇಂದ್ರನನ್ನು ಮೊಸಳೆಯಿಂದ ರಕ್ಷಿಸಿದನು. ೯. ಅವರು ಈ ಊರಿನಲ್ಲಿ ಒಂದು ಆಸ್ಪತ್ರೆಯನ್ನು[3] ಸ್ಥಾಪಿಸಿದರು. ೧೦. ಬಿರುಗಾಳಿಯಿಂದ ಮರದಕೊಂಬೆಗಳು ಅಲ್ಲಾಡಿದವು.[4] ೧೧. ಮಿತ್ರನ ಕುಶಲವಾರ್ತೆಯನ್ನು ಕೇಳಿ ರಾಮನು ಸಂತೋಷಪಟ್ಟನು. ೧೨. ಶಕುನಿಯ ವಿಷಬೀಜವು ಫಲಿಸಿತು ; ಕೌರವರೆಲ್ಲರೂ ಸತ್ತುಹೋದರು.

---

1. अङ्गुलीयकम् 2. पोलिकम् 3. चिकित्सालयम्
4. कम्पिताः

ಪ್ರಯೋಗ

ಈ ವಾಕ್ಯಗಳನ್ನು ಗಮನಿಸಿ—

೧. **शिशुपालः कृष्णमनिन्दत्** = ಶಿಶುಪಾಲನು ಕೃಷ್ಣನನ್ನು ನಿಂದಿಸಿದನು.

೨. **पुत्राः पितरमनमत्** = ಮಗನು ತಂದೆಯನ್ನು ನಮಸ್ಕರಿಸಿದನು.

ಮೇಲಿನ ವಾಕ್ಯಗಳಲ್ಲಿ ಕರ್ತೃಪದಗಳು ಪ್ರಥಮಾ ವಿಭಕ್ತಿಯಲ್ಲಿಯೂ, ಕರ್ಮಪದಗಳು ದ್ವಿತೀಯಾ ವಿಭಕ್ತಿಯಲ್ಲಿಯೂ ಇವೆ. ಕ್ರಿಯಾಪದವು ಕರ್ತೃಪದದೊಡನೆ ಅನ್ವಯಿಸಿರುವುದರಿಂದ ಈ ವಿಧವಾದ ಪ್ರಯೋಗಕ್ಕೆ ಕರ್ತರಿಪ್ರಯೋಗವೆಂದು ಹೆಸರು. ಹಿಂದಿನ ಪಾಠಗಳಲ್ಲಿ ನೀವು ಈ ಬಗೆಯ ವಾಕ್ಯಗಳನ್ನೇ ನೋಡಿರುವಿರಿ. ಆದರೆ ಈ ವಾಕ್ಯಗಳನ್ನು ಗಮನಿಸಿರಿ.

೧. **शिशुपालेन कृष्णः अनिन्द्यत** = ಶಿಶುಪಾಲನಿಂದ ಕೃಷ್ಣನು ನಿಂದಿಸಲ್ಪಟ್ಟನು.

೨. **पुत्रेण पिता अनम्यत** = ಮಗನಿಂದ ತಂದೆಯು ನಮಸ್ಕರಿಸಲ್ಪಟ್ಟನು.

ಇಲ್ಲಿ ಕರ್ತೃಪದಗಳು ತೃತೀಯಾ ವಿಭಕ್ತಿಯಲ್ಲಿಯೂ, ಕರ್ಮಪದಗಳು ಪ್ರಥಮಾ ವಿಭಕ್ತಿಯಲ್ಲಿಯೂ ಇವೆ. ಕ್ರಿಯಾಪದಗಳು ಕರ್ಮಪದದೊಡನೆ ಅನ್ವಯಿಸಿವೆ. ಇದಕ್ಕೆ ಕರ್ಮಣಿಪ್ರಯೋಗವೆಂದು ಹೆಸರು. ಕರ್ಮಣಿಪ್ರಯೋಗದಲ್ಲಿ ಕ್ರಿಯಾಪದಗಳು ತಾವು ಅನ್ವಯಿಸುವ ಕರ್ಮಪದಗಳ ವಚನವನ್ನೂ, ಪುರುಷವನ್ನೂ ಹೊಂದುತ್ತವೆ.

ವಿ.ಸೂ. : ಕರ್ಮಣಿಪ್ರಯೋಗದಲ್ಲಿ ಕರ್ಮಪದವನ್ನು ಪ್ರಥಮಾ ವಿಭಕ್ತಿಯಲ್ಲಿಯೂ, ಕರ್ತೃಪದವನ್ನು ತೃತೀಯಾ ವಿಭಕ್ತಿಯಲ್ಲಿಯೂ ಪ್ರಯೋಗಿಸಬೇಕು. ಈ ಪ್ರಯೋಗದಲ್ಲಿ ಎಲ್ಲಾ ಗಣದ ಧಾತುಗಳ ಮೇಲೂ **'य'** ವಿಕರಣಪ್ರತ್ಯಯ ಬಂದು ಆದರ ಮುಂದೆ ಆತ್ಮನೇಪದ ಪ್ರತ್ಯಯಗಳು ಮಾತ್ರ ಹತ್ತುತ್ತವೆ.

ಹಿಂದಿನ ಪಾಠದಲ್ಲಿ ಸಕರ್ಮಕ ಧಾತುಗಳಮೇಲೆ क्त ಪ್ರತ್ಯಯವು ಕರ್ಮಾರ್ಥದಲ್ಲಿ ಬರುತ್ತದೆಯೆಂದು ತಿಳಿಸಿದೆ. ಅಂತಹ ಶಬ್ದಗಳನ್ನು ಕರ್ಮಣಿ ಪ್ರಯೋಗದ ನಿಯಮದಂತೆ ಉಪಯೋಗಿಸಬೇಕು.

अभ्यासः २९

कर्णाटभाषया परिवर्तयत—

१. गृहाणां भित्तयः इष्टकाभिः रच्यन्ते । २. ततः ताः कर्मकरैः सुधया[1] लिप्यन्ते । ३. अस्यां शालायां छात्रैः संस्कृतभाषा पठ्यते । ४. दुर्जनैः सह सख्यं कुर्वाणस्त्वं मया त्यज्यसे । ५. क्रीडायां विजयशालिनो वयं मित्रैरभिनन्द्यामहे । ६. वनवासाय गन्तुमिच्छता रामेण कौसल्या अवन्द्यत । ७. वत्सोऽयं मुच्यताम् ; अनेन धेन्वाः क्षीरं पीयताम् । ८. विवाहकाले वध्वा अरुन्धतीनामकं नक्षत्रं दृश्येत । ९. विद्वांसः स्वदेशे परदेशे च पूज्यन्ते । १०. महानसे सूदेन अन्नमपच्यत ।

अभ्यासः ३०

संस्कृतभाषया परिवर्तयत—

೧. ನಿನಗೆ ನನ್ನಿಂದ ಒಂದು ಪತ್ರ ಬರೆಯಲ್ಪಡುತ್ತದೆ. ೨. ಹಗಲಿನಲ್ಲಿ ನಕ್ಷತ್ರಗಳು ನೋಡಲ್ಪಡುವುದಿಲ್ಲ. ೩. ಈ ತರಗತಿಯಲ್ಲಿ ಇಪ್ಪತ್ತು ವಿದ್ಯಾರ್ಥಿಗಳಿಂದ ಸಂಸ್ಕೃತವು ಕಲಿಯಲ್ಪಡುತ್ತದೆ. ೪. ಋಷಿಗಳಿಂದ ಹಣ್ಣುಗಳೂ ಗೆಡ್ಡೆಗಳೂ[2] ತಿನ್ನಲ್ಪಡುತ್ತವೆ. ೫. ನಿಮ್ಮಿಂದ ದುರ್ಜನರ ಸಹವಾಸವು ಬಿಡಲ್ಪಡಲಿ. ೬. ಕುಪಿತನಾದ ಹನುಮಂತನಿಂದ ಲಂಕೆಯು ಸುಡಲ್ಪಟ್ಟಿತು. ೭.ಸೋಮಾರಿಯಿಂದ ಹಣವಾಗಲಿ, ವಿದ್ಯೆಯಾಗಲಿ ಹೇಗೆ ದೊರಕಿಸಲ್ಪಟ್ಟೀತು[3]? ೮. ನ್ಯಾಯಾಧಿಪತಿಯಿಂದ ಅಪರಾಧಿಯು ಕೇಳಲ್ಪಟ್ಟನು. ೯. ರಾಜನಿಂದ ಎಲ್ಲಾ ಪ್ರಜೆಗಳೂ ಮಕ್ಕಳಂತೆ ಕಾಪಾಡಲ್ಪಡುತ್ತಾರೆ. ೧೦. ಸಾಯಂಕಾಲ ಪೂರ್ವದಿಕ್ಕಿನಲ್ಲಿ ಚಂದ್ರನು ನೋಡಲ್ಪಟ್ಟನು.

---

1. ಸುಣ್ಣದಿಂದ 2. कन्दाश्च 3. लभ्येत

ಶತೃ ಶಾನಚ್ ಪ್ರತ್ಯಯಗಳು

ಧಾತುವಿಗೆ ವರ್ತಮಾನಕಾಲದಲ್ಲಿ शतृ, शानच् ಎಂಬ ಕೃತ್ ಪ್ರತ್ಯಯಗಳು ಸೇರಿ ಪ್ರಾತಿಪದಿಕಗಳಾಗುತ್ತವೆ. ಇವುಗಳಮೇಲೆ ಎಲ್ಲ ವಿಭಕ್ತಿಗಳೂ ಅರ್ಥಾನುಸಾರವಾಗಿ ಬರುತ್ತವೆ. ಸಾಮಾನ್ಯವಾಗಿ ಇವು ವಿಶೇಷಣಗಳಾಗಿರುತ್ತವೆ. ಪರಸ್ಮೈಪದಿಯ ಮೇಲೆ शतृ ಪ್ರತ್ಯಯವೂ, ಆತ್ಮನೇಪದಿಯಮೇಲೆ शानच् ಪ್ರತ್ಯಯವೂ ಬರುತ್ತವೆ. शतृ ವಿನಲ್ಲಿ अत् ಎಂಬುದೂ शानच् ನಲ್ಲಿ आन ಎಂಬುದೂ ಉಳಿಯುತ್ತವೆ. ಇವು ಸೇರಿದಾಗ ಆಗುವ ಕೆಲವು ಬದಲಾವಣೆಗಳನ್ನು ಗಮನಿಸಿರಿ.

शतृप्रत्ययः

प्रथमैकवचनरूपाणि

धातुः	पु.	स्त्री.	न.
भू	भवन्	भवन्ती	भवत्
पच्	पचन्	पचन्ती	पचत्
गम्	गच्छन्	गच्छन्ती	गच्छत्
दृश्	पश्यन्	पश्यन्ती	पश्यत्
दिव्	दीव्यन्	दीव्यन्ती	दीव्यत्
चुर्	चोरयन्	चोरयन्ती	चोरयत्
कृ	कुर्वन्	कुर्वती	कुर्वत्

शानच्प्रत्ययः

	पु.	स्त्री.	न.
सेव्	सेवमानः	सेवमाना	सेवमानम्
ईक्ष्	ईक्षमाणः	ईक्षमाणा	ईक्षमाणम्
कृ	कुर्वाणः	कुर्वाणा	कुर्वाणम्

ಮೇಲಿನವು ಕರ್ತ್ರರ್ಥದ ರೂಪಗಳು. ಕರ್ಮಾರ್ಥದಲ್ಲಿ ಎಲ್ಲಾ ಧಾತುಗಳಿಗೂ शानच् ಪ್ರತ್ಯಯವು ಮಾತ್ರ ಬರುತ್ತದೆ. ನಡುವೆ य ಎಂಬ ವಿಕರಣ ಪ್ರತ್ಯಯ ಸೇರುತ್ತದೆ.

ಉದಾಹರಣೆ— पु. स्त्री. न.

पठ्	पठ्यमानः	पठ्यमाना	पठ्यमानम्=ಓದಲ್ಪಡುವ
दृश्	दृश्यमानः	दृश्यमाना	दृश्यमानम्=ನೋಡಲ್ಪಡುವ
कृ	क्रियमाणः	क्रियमाणा	क्रियमाणम्=ಮಾಡಲ್ಪಡುವ

अभ्यासः ३१

कर्णाटभाषया परिवर्तयत—

१. अलसः बालकः कालं यापयन् नाभिवर्धते। २. आगच्छन्तीं लक्ष्मीं को वा निवारयति? ३. त्वां पश्यन् अहं नितरां मोदे। ४. रोगिणे औषधानि फलानि च यच्छन् सः पुण्यं आर्जयति। ५. त्वां पश्यता मया लोकः विस्मृतो भवति। ६. शीघ्रं धावतः महिषस्य पादौ स्खलित्वा भग्नौ अभवताम्। ७. स्वदोषान् जानन् अपि त्वं कुतः न लज्जसे। ८. एधमानं सस्यं अंकुरावस्थायामेव जानन्ति कुशलाः। ९. श्रद्धया स्वकर्तव्यं कुर्वाणा जनाः कदापि दुःखभाजः न भवन्ति!

अभ्यासः ३२

संस्कृतभाषया परिवर्तयत—

೧. ನಾಟಕವನ್ನು ನೋಡುತ್ತಾ ನಾನು ಲೋಕವನ್ನೇ ಮರೆತನು. ೨. ಕಾಡಿನಲ್ಲಿ ಹೋಗುತ್ತಿದ್ದ ಸಿಂಹವನ್ನು ನೋಡಿ ನಾನು ಹೆದರಿದೆನು. ೩. ನಿನ್ನಿಂದ ಓದಲ್ಪಡುತ್ತಿರುವ ವಿಷಯವನ್ನು ಅವರು ಚೆನ್ನಾಗಿ ತಿಳಿಯುತ್ತಾರೆ. ೪. ನಮ್ಮನ್ನು ಯಾವಾಗಲೂ ಸೇವಿಸುತ್ತಿರುವ ಈ ಸೇವಕನಿಗೆ ಹಣವನ್ನೂ ಬಟ್ಟೆಯನ್ನೂ ಕೊಡು. ೫. ಅವನು ಓಡುತ್ತಿರುವ ಕುದುರೆಯಿಂದ ಕೆಳಗೆ ಬಿದ್ದನು. ೬. ಮೈದಾನದಲ್ಲಿ ಆಡುತ್ತಿರುವ ಹುಡುಗರು ಸಾಯಂಕಾಲ ಮನೆಗೆ ಹಿಂದಿರುಗುತ್ತಾರೆ. ೭. ಓಡುತ್ತಿರುವ ಉಗಿಬಂಡಿಯನ್ನು ಕಳ್ಳರು ಹತ್ತಿದರು. ೮. ಬೇಗನೆ ಹೋಗುತ್ತಿರುವ ಸ್ನೇಹಿತನನ್ನು ನೋಡಿ ನಾನು ನಕ್ಕೆನು. ೯. ಪ್ರಯತ್ನ ಮಾಡುತ್ತಿರುವ ಮನುಷ್ಯನಿಗೆ ಯಾವುದೂ ದುರ್ಲಭವಲ್ಲ.

ಭವಿಷ್ಯತ್ಕಾಲ

ವರ್ತಮಾನಕಾಲ (लट्) ಭೂತಕಾಲ (लङ्) ಆಜ್ಞಾರ್ಥ (लोट्) ವಿಧಿ (विधिलिङ्) ಈ ಅರ್ಥದ ಧಾತುಗಳ ಪ್ರಯೋಗವು ಹಿಂದಿನ ಪಾಠದಲ್ಲಿ ಬಂದಿದೆ. ಮುಂದೆ ನಡೆಯಲಿರುವ ವಿಷಯವನ್ನು ಬೋಧಿಸುವ ಲಕಾರವನ್ನು ಲೃಟ್ (लृट्) ಎನ್ನುವರು. ಭವಿಷ್ಯತ್ ಕಾಲದಲ್ಲಿ ಧಾತುವಿನ ಮೂಲರೂಪಕ್ಕೆ ಸ್ಯ (ಷ್ಯ) ಪ್ರತ್ಯಯ ಸೇರಿ ಮುಂದೆ ತಿಙ್ ಪ್ರತ್ಯಯಗಳು ಸೇರುತ್ತವೆ.

ಪರಸ್ಮೈಪದ

೧. गम् ಧಾತು =ಹೋಗು. ಭವಿಷ್ಯತ್ಕಾಲ (लृट्)

	ಏಕವಚನ	ದ್ವಿವಚನ	ಬಹುವಚನ
ಪ್ರ. ಪು.	गमिष्यति	गमिष्यत:	गमिष्यन्ति
ಮ. ಪು.	गमिष्यसि	गमिष्यथ:	गमिष्यथ
ಉ. ಪು.	गमिष्यामि	गमिष्याव:	गमिष्याम:

ಆತ್ಮನೇಪದ

೨. मुद् ಧಾತು =ಸಂತೋಷಿಸು

ಪ್ರ. ಪು.	मोदिष्यते	मोदिष्येते	मोदिष्यन्ते
ಮ. ಪು.	मोदिष्यसे	मोदिष्येथे	मोदिष्यध्वे
ಉ. ಪು.	मोदिष्ये	मोदिष्यावहे	मोदिष्यामहे

ಕರ್ಮಾರ್ಥದಲ್ಲಿ ಎಲ್ಲ ಧಾತುಗಳಿಗೂ ಆತ್ಮನೇಪದ ಮಾತ್ರ ಬರುತ್ತದೆ ಎಂಬುದನ್ನು ನೆನಪಿನಲ್ಲಿಡಬೇಕು. ಅರ್ಥಭೇದವನ್ನು ಗಮನಿಸಿರಿ.

पठिष्यति =ಓದುವನು   पठिष्यते =ಓದಲ್ಪಡುವುದು

अभ्यास: ३३

कर्णाटभाषया परिवर्तयत—

१. बाला:, यूयं सम्यक् पठत, धीमन्त: कीर्तिमन्तश्च भविष्यथ। २. श्व: मेघ: वर्षिष्यति न वा को वा ज्ञास्यति ? ३. अद्य य: न पठिष्यति

सः श्वः कार्यं करिष्यति इति को वा प्रत्ययः ? ४. सर्वे बालाः प्रथमं गुरून् नंस्यन्ति, ततः कक्ष्यायां उपवेक्ष्यन्ति। ५. मूर्खाः वीथीषु वृथा अटिष्यन्ति। ६. अस्माकं ग्रामे एकं चिकित्सालयं, पाठशालां पुस्तकालयं च जनाः संभूय स्थापयिष्यन्ति। ७. तौ श्वः प्रभाते विमानयानेन राजधानीं गमिष्यतः। ८. यूयं रामायणपारायणेन मनश्शान्ति आनन्दं च लप्स्यध्वे। ९. गोपः सायाह्ने सर्वाः धेनूः अस्माकं गृहस्य पुरतः धोक्ष्यति। १०. भिक्षुकाः याचिष्यन्ते इति कृपणाः अन्नं न पक्ष्यन्ति।

अभ्यासः ३४

संस्कृतभाषया परिवर्तयत—

೧. ನಾವು ನಿಜವಾಗಿಯೂ ನಾಳೆ ಊರಿಗೆ ಹೋಗುವೆವು. ೨. ನಾಡಿದ್ದು ನನ್ನ ಸ್ನೇಹಿತನ ಹುಟ್ಟುಹಬ್ಬವು ನಡೆಯುವುದು. ೩. ನೀವು ಹೇಳಿದ್ದನ್ನು ಏಕೆ ತಿಳಿಯುವುದಿಲ್ಲ? ೪. ನಿಮ್ಮ ಮಾತನ್ನು ಕೇಳಿ ಅವರು ನಗುವರು. ೫. ಯಾರು ರಕ್ಷಿಸುವರೋ ಅವರು ಗೌರವವನ್ನು ಹೊಂದುವರು. ೬. ಋಷಿಗಳು ಬೆಳಗಿನ ಜಾವದಲ್ಲಿ ಸ್ನಾನಮಾಡುವರು ಮತ್ತು ಜಪಿಸುವರು. ೭. ನಮ್ಮನ್ನು ನೀವು ಏಕೆ ನಿಂದಿಸುವಿರೋ ನಾನು ತಿಳಿಯುವುದಿಲ್ಲ. ೮. ನೀನು ಹಾವನ್ನು ಹೊಡೆಯುವೆಯಾ? ಅದು ನಿನ್ನನ್ನು ಕಚ್ಚುವುದು. ೯. ತಾಯಿಯು ಯಾವಾಗ ಹಾಡುವಳೋ ಆಗ ಮಗುವು ಹಾಲನ್ನು ಕುಡಿಯುವುದು. ೧೦. ಹದ್ದುಗಳು ಬಹಳ ದೂರದಿಂದಲೇ ಸೂಕ್ಷ್ಮವಸ್ತುಗಳನ್ನು ನೋಡುವುವು.

संख्याः

ಪುಲ್ಲಿಂಗ : एकः पुरुषः, द्वौ बालौ, त्रयः वृक्षाः, चत्वारः आपणाः।

ಸ್ತ್ರೀಲಿಂಗ : एका बाला, द्वे स्त्रियौ, तिस्रः घटिकाः, चतस्रः श्रुतयः।

ನಪುಂಸಕಲಿಂಗ : एकं फलम्, द्वे नेत्रे, त्रीणि वनानि, चत्वारि पुस्तकानि।

ಈ ನಾಲ್ಕು ಶಬ್ದಗಳು ಲಿಂಗಭೇದದಿಂದ ರೂಪಭೇದವನ್ನು ಹೊಂದುತ್ತವೆ. पञ्च ಮುಂತಾದ ಶಬ್ದಗಳಿಗೆ ಎಲ್ಲಾ ಲಿಂಗದಲ್ಲಿಯೂ ಒಂದೇ ರೂಪ. पञ्च पाण्डवाः, षट् शास्त्राणि, सप्त समुद्राः, अष्ट वसवः, नव ग्रहाः, दश अवताराः.

एकादश, द्वादश, त्रयोदश, चतुर्दश, पञ्चदश, षोडश, सप्तदश, अष्टादश, नवदश, (एकोनविंशतिः) विंशतिः, एकविंशतिः, द्वाविंशतिः, त्रयोविंशतिः, चतुर्विंशतिः पञ्चविंशतिः, षड्विंशतिः, सप्तविंशतिः, अष्टाविंशतिः, एकोनत्रिंशत्, त्रिंशत्, एकत्रिंशत्, द्वात्रिंशत्, त्रयस्त्रिंशत्, चतुस्त्रिंशत्, पञ्चत्रिंशत्, षट्त्रिंशत्, सप्तत्रिंशत्, अष्टत्रिंशत्, एकोनचत्वारिंशत्, चत्वारिंशत्, पंचाशत्, षष्टिः, सप्ततिः अशीतिः, नवतिः, शतम्, एकोत्तरशतम्—सहस्रम्, लक्षम्, कोटिः, अर्बुदम्।

सुभाषितम्

१. यथा राजा तथा प्रजा। २. यथा बीजं तथांकुरः। ३. अति सर्वत्र वर्जयेत्। ४. हितं मनोहारि च दुर्लभं वचः। ५. सहसा विदधीत न क्रियाम्। ६. नास्त्युद्यमसमो बन्धुः। ७. गतं न चिन्तयेत् प्राज्ञः। ८. जातस्य हि ध्रुवो मृत्युः। ९. यतो धर्मस्ततो जयः। १०. कर्मण्येवाधिकारस्ते। ११. चिंतासमं नास्ति शरीरशोषणम्। १२. नास्ति मातृसमो बन्धुः। १३. अल्पविद्या महागर्वी। १४. न देवतोषणं वृथा। १५. विनाशकाले विपरीतबुद्धिः। १६. बुद्धिः कर्मानुसारिणी। १७. आत्मैव ह्यात्मनो बन्धुः। १८. उच्छृंखलं बाल्यमनर्थाय।

१९. वि[1]-श्वा[2]-अहि[3] अमित्र पशुषु
कर्दमेषु जलेषु च।
अन्धे तमसि वार्धक्ये
दण्डं दशगुणं भवेत्॥

२०. लालनाद् बहवो दोषाः तर्जनाद् बहवो गुणाः। तस्मात् पुत्रं च शिष्यं च तर्जयेन्न तु लालयेत्॥ २१. न हि सर्वः सर्वं जानाति। २२. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्। २३. निस्पृहस्य तृणं जगत्।

प्रबन्धरचना

ಸರಳವಾದ, ಸುಂದರವಾದ ವಾಕ್ಯಗಳಿಂದ ಯಾವುದಾದರೊಂದು ವಿಷಯವನ್ನು ವಿಸ್ತರಿಸಿ ತಿಳಿಸುವುದೇ ಪ್ರಬಂಧ. ಪ್ರಬಂಧ ಬರೆಯುವುದಕ್ಕೆ ಮೊದಲು ಕೆಲವು ಮುಖ್ಯವಾದ ವಿಷಯಗಳನ್ನು ಆಲೋಚಿಸಿ ಗುರುತಿಸಿ ಕೊಳ್ಳಬೇಕು. ಪ್ರಬಂಧದಲ್ಲಿ ಆರಂಭ, ಮಧ್ಯ, ಉಪಸಂಹಾರ ಎಂದು ಮೂರು ಭಾಗಗಳಿರಬೇಕು. ಆರಂಭದಲ್ಲಿ ಉಪೋದ್ಘಾತ, ವಿಷಯದ ಮಹತ್ತ್ವ, ವಿಷಯದ ಪ್ರವೇಶ ಇವುಗಳೂ, ಮಧ್ಯದಲ್ಲಿ ವಿಷಯದ ವಿಶ್ಲೇಷಣೆ, ದೃಷ್ಟಾಂತಗಳಿಂದ ಸಮರ್ಥನೆ, ಯುಕ್ತಿಗಳಿಂದ ವಿಷಯಪ್ರತಿಪಾದನೆಗಳಿರಬೇಕು. ಉಪಸಂಹಾರದಲ್ಲಿ ಹಿಂದೆ ಹೇಳಿರುವ ವಿಷಯಗಳನ್ನು ಸಂಕ್ಷೇಪಿಸಿ, ವಿಷಯಗಳ ಜ್ಞಾನದಿಂದ ಉಂಟಾಗುವ ಪ್ರಯೋಜನವನ್ನು ಹೇಳುತ್ತಾ ಪ್ರಬಂಧವನ್ನು ಮುಗಿಸಬೇಕು. ಪ್ರಬಂಧವು ಸ್ಥಳ, ಮೃಗಪಕ್ಷಿಗಳ ವರ್ಣನೆ, ಕಥೆ, ಪ್ರವಾಸವರ್ಣನೆ, ಆತ್ಮಕಥೆ ಮುಂತಾಗಿ ಅನೇಕ ರೂಪದಿಂದ ಇರಬಹುದು.

---

1. ಹಕ್ಕಿ. 2. ನಾಯಿ. 3. ಸರ್ಪ

ಹಸು (धेनुः) ಎಂಬ ವಿಷಯದಲ್ಲಿ ಪ್ರಬಂಧ ಬರೆಯುವಾಗ ಈ ಕೆಳಗಿನ ಅಂಶಗಳನ್ನು ಗುರುತಿಸಿರಿ. ಅನಂತರ ಒಂದೊಂದು ಅಂಶವನ್ನೂ ಕೆಲವು ವಾಕ್ಯಗಳಿಂದ ವಿವರಿಸಿರಿ.

धेनुः–तस्याः अङ्गानि–धेनुषु जातयः–आहारः–उपयोगः–गोपालः, तस्य कर्तव्यम्, गो भक्तिः, अस्माकं कर्तव्यम्।

ಈ ಅಂಶಗಳನ್ನು ಉಪಯೋಗಿಸಿ ಬರೆದಿರುವ ಕೆಳಗಿನ ಪ್ರಬಂಧವನ್ನು ನೋಡಿರಿ.

धेनुः

समग्रप्रपञ्चे धेनुं को वा न जानाति ? अतीव साध्वी धेनुः मातेवास्मान् रक्षतीति विवेकिनः सर्वे बोधन्ति । स चतुष्पाज्जन्तुः । चत्वारः पादाः, द्वे शृङ्गे, लोमयुक्तं लाङ्गूलं लम्बमाना सास्ना, धवलादयः वर्णाः एते गोः साधारणाः विशेषाश्च अंशाः ।

देशीयानां धेनूनां क्षीरं रुच्यं, पथ्यं चेति वदन्ति । सीमाधेनवः बहुक्षीरं यच्छन्ति । परन्तु ताः अल्पया सास्नया युताः महिषीसदृश्यः दृश्यन्ते । धेनवः हम्भारवं कुर्वन्ति । सः ध्वनिः श्रोतुं मधुरतरः ।

धेनोः आहारः अल्पमूल्यः सुलभश्च । सा शाद्वले हरिततृणानि भक्षयति । कासाराणां मधुरं जलं पिबति । गृहे गोपालः शुष्कतृणं, पिण्याकं, बुसं च तस्यै यच्छति । दोहनसमये तस्याः पुरः बुसादिकं खाद्यं स्थापयति गोपालः । तद् भक्षयन्ती सा मधुरं क्षीरं यच्छति । वत्सः प्रथमं धेनोः स्तनात् दुग्धं पिबति । ततः गोपालः भूमौ उपविश्य वामहस्ते, जानुनोः मध्ये, भूमौ वा पात्रं स्थापयित्वा दक्षिणहस्तेन पात्रे गां क्षीरं दोग्धि । दोहनानन्तरं पुनरेकावरं वत्सं क्षीरपानाय मुञ्चति ।

प्रभातकालः सायङ्कालश्चेति द्वौ दोहनसमयौ। गोपालः उत्तमं आहारं दत्वा गां पोषयेत्। धेनूनां पालनेन न केवलं जीविका, किन्तु मानववर्गस्यैव महानुपकारो भवति। गोः दुग्धं अतीव मधुरं पथ्यं च भवति। तप्तं दुग्धं कवोष्णं कृत्वा पिबन्ति। आतञ्चनेन क्षीरं दधि भवति। दधि पुष्टिकरमिति सर्वे वदन्ति। दध्नः मथनेन नवनीतं तक्रं च लभ्यते। तापनेन नवनीतं घृतं भवति। घृतेन वर्धते बुद्धिः। एतानि सर्वाणि वस्तूनि मनुष्यस्य आहाररूपाणि। गोमयेन करीषं भवति।

अस्माकं पूर्वजाः गोभक्ताः आसन्। श्रीकृष्णः गोपालनमकरोत्। दिलीपादयः चक्रवर्तिनोऽपि गोसेवामकुर्वन्। गावः विश्वस्य मातरः। वयं सर्वेऽपि गोसेवां करवाम। गोसन्ततेः अभिवृद्धिं करवाम। गोभ्यः स्वस्ति।

अभ्यासः १

ಈ ಕೆಳಗಿನ ಅಂಶವನ್ನು ಅವಲಂಬಿಸಿ ಕಾವೇರೀ ನದಿ– 'कावेरी नदी' ಎಂಬ ವಿಷಯದಲ್ಲಿ ಒಂದು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

कावेरी नदी—अस्माकं देशस्य सप्तनदीषु अन्यतमा—प्रायः षट्शत क्रोश (६००) दीर्घा—कर्नाटक राज्ये—सप्त पर्वते ब्रह्मगिरौ जन्म — अगस्त्यमुनेः पत्नी — अगस्त्येन तस्याः नियमः — मां विहाय कुत्रापि न गन्तव्यम् इति—एकदा शिष्यवशे तां स्थापयित्वा गमनम्—तस्याः नदीरूपप्राप्तिः — तस्याः उपयोगः — कृषिकर्मणि जलबन्धाः (ಅಣೆಕಟ್ಟು) विद्युच्छक्तिः तस्याः जलेन निष्पाद्यते। तस्याः जलं—अनेकनगरेषु पानाय आनीयते—तीरे नगराणि—कर्णाटक—द्राविड प्रान्तयोः तस्या उपकारः—सा भक्तिमुक्तिकरी नदी—प्रातः सायं कावेर्यै नमः।

अभ्यासः २

इमान् विषयानधिकृत्य लघुप्रबन्धान् आरचयत—

१. वाराणसी २. कल्याणनगरी ३. गजः ४. दीपावली ५. शालायाः वार्षिकोत्सवः ६. अहं कुतः संस्कृतभाषां पठामि? ७. उद्यानम् ८. पुस्तकभण्डारः

पत्रलेखनम्

ಈಗಿನ ಕಾಲದಲ್ಲಿ ಪತ್ರವ್ಯವಹಾರವಿಲ್ಲದೆ ಜೀವಿಸಲು ಸಾಧ್ಯವೇ ಇಲ್ಲ. ಹಿಂದೆ ಪ್ರಯಾಣ ಸೌಕರ್ಯಗಳು ಕಡಿಮೆಯಾಗಿದ್ದಾಗ, ರಾಜರು, ಧನಿಕರು ಮತ್ತು ಗುರುಮನೆಗಳಲ್ಲಿ ಮಾತ್ರ ಪತ್ರವ್ಯವಹಾರವು ವಿಶೇಷವಾಗಿ ನಡೆಯುತ್ತಿತ್ತು. ಪತ್ರಗಳನ್ನು ದೂತರು ಕಾಲ್ನಡಿಗೆಯಿಂದ ಒಯ್ಯುತ್ತಿದ್ದರು. ಕುದುರೆ ಸವಾರರ ಮೂಲಕ ಪತ್ರವ್ಯವಹಾರವನ್ನು ರಾಜರು ಮಾಡುತ್ತಿದ್ದರು. ಈಗ ಬಸ್, ಹಡಗು, ವಿಮಾನ ಮುಂತಾದವುಗಳ ಮೂಲಕ ಪತ್ರಗಳನ್ನು ಬಹಳ ಬೇಗನೆ ದೂರದ ಸ್ಥಳಕ್ಕೂ ಒಯ್ಯಲು ಸಾಧ್ಯ. ನಾವು ಬಂಧುಗಳಿಗೆ ಪತ್ರಗಳನ್ನು ಬರೆಯಬೇಕಾಗುತ್ತದೆ. ವ್ಯವಹಾರಕ್ಕಾಗಿ ಪತ್ರ ಬರೆಯಬೇಕಾಗುತ್ತದೆ. ಹೀಗಾಗಿ ಸಂಸ್ಕೃತ ಭಾಷೆಯನ್ನು ಕಲಿಯುವವರು ಸಂಸ್ಕೃತದಲ್ಲಿಯೂ ಪತ್ರಲೇಖನದ ಪರಿಚಯವನ್ನು ಮಾಡಿಕೊಳ್ಳುವುದು ಒಳ್ಳೆಯದು.

ಇವು ಪತ್ರಲೇಖನದ ವಿಭಾಗಗಳು—

१. **शिरोलेखनम् (शीर्षिका)** ಈ ವಿಭಾಗದಲ್ಲಿ ಮೇಲೆ श्रीः ಎಂದು ಬರೆದು ಬಲಭಾಗದ ಮೂಲೆಯಲ್ಲಿ ವಾಸಸ್ಥಳ (ಊರಿನ ಹೆಸರು) ಮತ್ತು ದಿನಾಂಕಗಳನ್ನು ಬರೆಯಬೇಕು. ಎಡದ ಮೂಲೆಯಲ್ಲಿ क्षेमम् ಎಂದು ಬರೆಯಬೇಕು.

ಉದಾಹರಣೆ—

क्षेमम् श्रीः कल्याणनगरी (बेंगलूरु)

श्रीमुख संवत्सरः कार्तिकशुक्लद्वादशी

२६—११—१९९३

२. **सम्बोधनम्**— ಪತ್ರಬರೆಯುವವನಿಗೂ ಪತ್ರವನ್ನು ಪಡೆಯುವವನಿಗೂ ಇರುವ ಸಂಬಂಧವನ್ನು ಅನುಸರಿಸಿ ಸಂಬೋಧಿಸಬೇಕು. ಉದಾಹರಣೆ—**परमपूज्यानां पितृचरणानां पादयोः साष्टाङ्गप्रणामाः (ತಂದೆಗೆ), मातृश्रीचरणारविन्दयोः प्रणतयः (ತಾಯಿಗೆ), तीर्थरूपसमानानां........ पादयोः प्रणामाः (ಹಿರಿಯರಿಗೆ), मातृश्रीसमानायाः........... पादयोः प्रणामाः (ಹಿರಿಯ ಹೆಂಗಸರಿಗೆ), पूज्यानां, मान्यानां, महोदयानां, परमप्रीतिपात्रस्य सुहृन्मणेः आलिङ्गनपूर्वकं लिखितं पत्रम्, वयस्यायै शान्तायैः, तवात्यन्त स्नेहपात्रीभूतया सीतया लिखितं पत्रम्, अये प्रियमित्र नमस्ते** ಇತ್ಯಾದಿ ರೀತಿಯಿಂದ ಪತ್ರಪ್ರಾರಂಭವನ್ನು ಮಾಡಬಹುದು.

३. **विषयः**—ಯಾರನ್ನು ಕುರಿತು ಕಾಗದ ಬರೆಯುತ್ತೇವೆಯೋ ಅವರಿಗೆ ಸರಿಯಾಗಿ ಅರ್ಥವಾಗುವಂತೆ ಸ್ಫುಟವಾದ ಅಕ್ಷರಗಳನ್ನು ಬರೆಯಬೇಕು. ವಾಕ್ಯಗಳು ಚಿಕ್ಕದಾಗಿ ತಪ್ಪಿಲ್ಲದೆ ಇರುವುದು ಒಳ್ಳೆಯದು. ವಿಷಯಗಳನ್ನು ಬದಲಾಯಿಸುವಾಗ ಪರಿಚ್ಛೇದ (Paragraph) ವನ್ನು ಬದಲಾಯಿಸಬೇಕು.

४. **समाप्तिः**— ಇಲ್ಲಿ इति भवदीयः, त्वदीयः, त्वदीया, भवदीया, इत्येवं कृता साष्टाङ्गनमस्काराः, भवदीयः विश्वासी ಇತ್ಯಾದಿ ರೀತಿಯಿಂದ ಸಮಾಪ್ತಿಗೊಳಿಸಬೇಕು.

५. **हस्ताङ्कनम्**—ಪತ್ರದ ಕೊನೆಯಲ್ಲಿ ತನ್ನ ಹೆಸರನ್ನು ಬರೆಯಬೇಕು. ರುಜುಮಾಡಿದಾಗ ಕಂಸದಲ್ಲಿ ಹೆಸರನ್ನು ಬಿಡಿಸಿ ಸ್ಪಷ್ಟವಾಗಿ ಬರೆಯಬೇಕು. ಪತ್ರದ ಆರಂಭದಲ್ಲಿಯೇ ತನ್ನ ಹೆಸರನ್ನು ಕಾಣಿಸುವ ಪದ್ಧತಿಯೂ ಇದೆ.

ಉದಾ : स्वस्ति महीशूरनगरात् साम्बमूर्तिः पितृचरणयोः प्रणिपातपूर्वकं विज्ञापयति—ಇತ್ಯಾದಿ. ಹೀಗೆ ಬರೆದರೂ ಕೊನೆಗೆ ರುಜು ಇರಬೇಕು.

६. **पत्रसङ्केतः** (ವಿಳಾಸ)—ಪತ್ರವಿಭಾಗದವರಿಗೆ ಓದಲು ಅನುಕೂಲಿಸುವಂತೆ ಸ್ಪಷ್ಟವಾಗಿ ಪತ್ರದ ಮೇಲ್ಭಾಗದಲ್ಲಿ ವಿಳಾಸವನ್ನು ಬರೆಯಬೇಕು. ಎಡಭಾಗದ ಕೆಳಗಿನ ಪಾರ್ಶ್ವದಲ್ಲಿ ತನ್ನ ವಿಳಾಸವನ್ನು ಬರೆಯಬೇಕು. ಪತ್ರದ

ಒಳಗಡೆ ತನ್ನ ವಿಳಾಸವನ್ನು ಪತ್ರ ಮುಗಿಸಿದ ಮೇಲೆ ಎಡಭಾಗದಲ್ಲಿ ಬರೆಯಬೇಕು. ಉದಾಹರಣೆ–

रामशर्मा	श्रीयुत सुन्दरेशः
संख्या–४	गृहसंख्या–३१/१
विद्यार्थिनिलयः	महाविपणिवीथी (ದೊಡ್ಡಪೇಟೆ)
विश्वेश्वरपुरम्	महीशूरपुरी
कल्याणनगरी (बेंगलूरु)	पत्रविभागसंख्या ४

१. पितरं प्रति पुत्रस्य पत्रम्

क्षेमम्　　　　श्रीः

विश्वेश्वरपुरम्
कल्याणनगरी
श्रीमुख कार्तिकशुक्ल द्वादशी
शुक्रवासरे
२६–११–१९९३

परमपूज्यानां पितृचरणानां पादयोः रामशर्मा साष्टाङ्गं प्रणम्य विज्ञापयति ।

अहमत्र कुशली । तत्रापि सर्वे कुशलिनः इति जानामि । भवतां सर्वेषां कुशलपत्रिका तदा तदा विलिख्य प्रेषणीया ।

भवतां पत्रं प्राप्तम् । आयुष्मान् शङ्करः अर्धवर्षीयपरीक्षायां प्रथमश्रेण्यां प्रथमं स्थानं प्राप्तवानिति श्रुत्वा नितरां मोदे । भवन्तः अपि संस्कृतभाषायां नूतनं पुस्तकमेकं विरचितवन्त इत्यहं आकर्णयामि । तेन महान् मे प्रमोदो जातः । तत्पुस्तकं मह्यं प्रेषयन्तु इत्यभ्यर्थये ।

मम वार्षिकी परीक्षा शीघ्रमेव प्रारप्स्यते । अहं समयं व्यर्थं न करोमि । यावच्छक्ति पठामि। उत्तमकक्ष्यायामुत्तीर्णो भविष्यामीति मम विश्वासः वर्तते ।

मातृचरणयोः मम साष्टाङ्गनमस्काराः वक्तव्याः। शीघ्रं प्रत्युत्तरं लिख्यताम् इति प्रार्थये ।

इति भवतामाशीर्वादाभिलाषी

रामशर्मा

पत्रसङ्केतः (Address)–

रामशर्मा	सुन्दरेशः
संख्या ४	गृ. सं. ३१/१
विद्यार्थिनिलयः	महाविपणिवीथी
विश्वेश्वरपुरम्	महीशूरपुरी
कल्याणनगरी (बेंगलूर)	पत्रविभागसंख्या ४

२. पित्रा पुत्राय लिखितं प्रत्युत्तरम्

कुशलम् श्रीः महीशूरपुरी

दिनांक २९–११–१९९३

श्रीमुखवत्सरीय कार्तिकशुक्लपूर्णिमा

स्वस्ति । चिरंजीविने रामशर्मणे आशिषः । वयमत्र सर्वे कुशलिनः । सानन्दं वाचितं भवदीयं पत्रम्। तवानुजः शङ्करः सम्यक् पठति । तव विषये तदा तदा वार्तां पृच्छति । बाला शान्ता तावदितस्ततः धावन्ती कलमधुराणि कानिचिद्वचनानि उच्चारयन्ती सर्वान् अस्मान् आनन्दयति। मया लिखितं संस्कृतोल्लासनामकं बालयोग्यं पुस्तकमद्यैव प्रेषितवानस्मि ।

वत्स ! पठनीयं विषयं सावधानं पठ्यताम्। किञ्च 'शरीरमाद्यं खलु धर्मसाधनम्' इति वचनं त्वया मा विस्मर्यताम्। प्रत्यहं किञ्चित्समयपर्यन्तं व्यायामः कर्तव्यः। बहिः किञ्चिदटनं कर्तव्यम्।

आरोग्यं भास्करादिच्छेत् श्रियमिच्छेत् हुताशनात्।
ज्ञानं महेश्वरात् इच्छेत् मोक्षमिच्छेत् जनार्दनात्॥

इति गुरूणामुपदेशः सर्वथा मनसि स्थापनीयः।

अस्तु। त्वदीयां कुशलवार्तां प्रतिसप्ताहं पत्रद्वारा बोधय। तव मातुरनन्ताः प्रेमाशिषः प्रेष्यन्ते।

महीशूरपुरी
२९–११–१९९३
श्रीमुखवत्सरीय कार्तिकशुक्लपूर्णिमा

इत्यायुष्मति वत्से क्रियमाणाः
परस्सहस्राः आशिषः
सुन्देरशशर्मा

३. मित्राय पत्रम्

श्रीः

क्षेमम्
प्रभाकरशर्मा
नेहरू नगरम्, गृ. सं. १०
प्रथमवीथी, शिवमोग्गा

महीशूरपुरी
पुराणाग्रहार, गृ. सं. ३२२
चतुर्थवीथी
दि. श्रावणबहुलाष्टमी श्रीमुखसंवत्सरः
८–८–१९९३

स्वस्ति। महीशूरपुरीतः तव परमसुहृत् राजेशः प्रीत्यालिङ्गनपूर्वकं सुहृन्मणिमभिनन्दति। इतो वयं सर्वे कुशलिनः। पाठशालायाः विरामदिवसेषु अस्मात् पुरात् स्वपत्तनं प्रति प्रस्थितः त्वमेकमपि पत्रं कुतो न

लिखितवान्। नाहं जाने। अस्तु, एषु विरामदिवसेषु अहं मातापितृभ्यां साकं क्षेत्राटनाय प्रस्थितः। तत्र पञ्चवटीक्षेत्रस्य परिसरः ममातीव इष्टतमोऽभवत्। बहवः भारतीयाः प्रतिदिनं पञ्चवटीमायान्ति, कतिचित् दिनानि तत्र निवसन्ति। आत्मानं धन्यं च मन्यन्ते। भगवतः रामचन्द्रस्य निवासेन पवित्रिता एषा भूमिः। अत्रैव तपोवने सीतालक्ष्मणाभ्यां सह दाशरथिः पितुराज्ञां पालयन् अवसत्। सत्साक्षिभूतानि बहूनि स्थलानि अत्र दृश्यन्ते। भगवत्या गोदावर्या नद्या पूतोऽयं प्रदेशः। तपोनिधि गौतमः श्रीशङ्करं तपसा प्रतोष्य तज्जटास्थितां गङ्गां अत्रैव दक्षिणापथमानयत्। त्र्यम्बकगिरेः शिखरे श्रीशङ्करः गङ्गांव्यसर्जयत्। ततः पूर्ववाहिनी सरिदियं महता वेगेन प्रवहति। असौ जलप्रवाहः नितरां पावनः, विशेषतः अधुना गुरौ सिंहस्थे पावनतरमिदं तीर्थम्। तस्मादेतत् स्थलं सर्वैरपि प्रेक्षितुं योग्यम्। तत्र केचन ज्ञानिनः सत्पुरुषाः अपि मिलिष्यन्ति। सतां सङ्गः पुण्येन लभ्यः खलु।

साम्प्रतमेतावता विरमामि।

इति भवतः सुहृद्वर्यः
राजेशः

४. विरामग्रहणाय आवेदनपत्रिका

श्रीविद्यावर्धिनी प्रौढशालायाः मुख्योपाध्यायानां सन्निधौ, प्रौढशालायाः नवमकक्ष्यायां पठन् प्रभाकरः, सादरप्रणामपूर्वकं विज्ञापयति।

मान्याः अध्यापकाः,

अहं श्वः मातापितृभ्यां साकं सुब्रह्मण्यक्षेत्रस्य यात्रोत्सवार्थं जिगमिषुरस्मि । अतः कृपया भवन्तः दिनद्वयं यावत् मह्यं विरामं यच्छन्तु । कक्ष्यायाः प्रथमाध्यापकानां संस्कृतपण्डितानां महादेवशास्त्रिणां हस्ताङ्कनं संमतिं च गृहीतवानस्मि ।

मम विरामसमये पाठ्यमानान् पाठान् सुहृत्सकाशे ज्ञात्वाहं पाठक्षतिं संपूरयिष्यामि ।

इति भवतां विधेयः

प्रभाकरः

नवमकक्ष्या प्रथमविभागः

विद्यावर्धिनीप्रौढशाला, महीशूरपुरी

२०–११–१९९३

५. उद्योगार्थमभ्यर्थनापत्रम्

विद्याविभागीयानां उद्योगदानाधिकृतानां सन्निधौ कृतः विज्ञप्तयः ।

परममान्याः,

तत्रभवद्भिः गतगुरुवासरस्य सर्वकारीयपरिपत्रे प्रकाशितं विज्ञापनमवलोक्याहमिदमावदेनपत्रं प्रेषयितुमुद्युक्तः । मम प्रार्थनामङ्गीकृत्य यदि भवन्तः अस्मिन् स्थाने मां नियोजयिष्यन्ति तर्हि अहं यावच्छक्ति सेवां कर्तुं प्रयते । प्रकाशितं स्थानं तु प्रौढशालायां समाजशास्त्रा- ध्यापनं स्थानम् । अहमितिहाशास्त्रं गृहीत्वा M.A. पदवीपरीक्षायां प्रथमश्रेण्यामुत्तीर्णः । संस्कृतभाषायां सुरसरस्वतीसभायाः अन्तिमपरीक्षायामप्युत्तीर्णः ।

ममेमां योग्यतामभिलक्ष्य यदि ममात्रावकाशो दीयते तदाहं प्रतिजानामि यत् भावि नागरिकान् बालकान् सम्यक् शिक्षयित्वा सुयोग्यान् करिष्यामीति । भवतां प्रत्युत्तरं निरीक्षमाणोऽहं विरमामि ।

कल्याणनगरी
२०—२—१९९३

इति भवदीयः विश्वासपात्रम्
कृष्णमूर्ति

मम पत्रसंकेतः—

कृष्णमूर्ति
गृ. सं. ४५, नरसिंहराजविस्तरणम्
तृतीयप्रधानवीथी
बेंगलूरु (कल्याणनगरी)

अभ्यासः ३

(1) ನಿಮ್ಮ ಮಾವನಿಗೆ ನಿಮ್ಮ ಅಭ್ಯಾಸದ ಬಗ್ಗೆ ಪತ್ರ ಬರೆಯಿರಿ.

(2) ತಮ್ಮನಿಗೆ ಚೆನ್ನಾಗಿ ಓದಬೇಕೆಂದು ಪತ್ರ ಬರೆಯಿರಿ.

(3) ನಿಮ್ಮ ಮಿತ್ರನಿಗೆ ರಜದಲ್ಲಿ ಬರಬೇಕೆಂದು ಪತ್ರ ಬರೆಯಿರಿ.

(4) ನಿಮ್ಮ ಶಾಲೆಯ ವಾರ್ಷಿಕೋತ್ಸವದ ವಿಷಯವಾಗಿ ತಂದೆಗೆ ಪತ್ರ ಬರೆಯಿರಿ.

(5) ನಿಮ್ಮ ಹುಟ್ಟಿದ ಹಬ್ಬದ ನಿಮಿತ್ತ ಒಂದು ದಿನ ರಜಕ್ಕಾಗಿ ನಿಮ್ಮ ಶಾಲೆಯ ಅಧ್ಯಾಪಕರಿಗೆ ಪತ್ರ ಬರೆಯಿರಿ.

यावदस्ति त्रयी लोके
　　चतुर्मुख-मुखोद्भवा।
यावद्वा रामचरितं
　　वाल्मीकिकविचित्रितम्॥

क्षरन्त्यमृतधारा वा
　　यावद्व्यासस्य सूक्तयः।
वाग्देव्या वरपुत्रस्य
　　कालिदासस्य वा गिरः॥

तावदेषा देवभाषा
　　देवी स्थास्यति भूतले।
यावच्च वंशोऽस्त्यार्याणां
　　तावदेषा ध्रुवं ध्रुवा॥

पुरे ग्रामे गृहे कुट्यां
　　बालो वृद्धो युवापि च।
करोतु संस्कृताभ्यासं
　　प्राप्नोतु सुखसम्पदम्॥

तृतीया परीक्षा

द्वितीया पत्रिका - अनुवाद प्रदीप - I
मार्गदर्शिनी प्रश्नपत्रिका उत्तरलेखनक्रमश्च

ಈ ಮಾರ್ಗದರ್ಶಿನೀ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಆಧರಿಸಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ರಚಿಸಬಹುದು.

ಉತ್ತರವನ್ನು ಸೂಚನೆಯಲ್ಲಿ ನೀಡಿರುವಂತೆ ಸಂಸ್ಕೃತ, ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿ ಬರೆಯಲು ಅವಕಾಶವಿದೆ.

ಪಾಠ್ಯಪುಸ್ತಕವನ್ನು ಆಧರಿಸಿ ಆಯಾ ಪರೀಕ್ಷೆಗಳಿಗನುಗುಣವಾಗಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಬದಲಾಯಿಸಬಹುದು.

ವಿದ್ಯಾರ್ಥಿಗಳು ಇಲ್ಲಿ ತಿಳಿಸಿರುವ ಉತ್ತರ ಬರೆಯುವ ಕ್ರಮವನ್ನು ಅನುಸರಿಸಬೇಕು.

ಅಂಕಗಳು : 50 **ಸಮಯ : ಎರಡು ಘಂಟೆಗಳು**

1. दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत 1 x 6 = 6

ಇಲ್ಲಿ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳುವಾಗ ಪಾಠ್ಯಪುಸ್ತಕದ ಪ್ರಬನ್ಧರಚನಾ ವಿಭಾಗದ ಅಭ್ಯಾಸದಲ್ಲಿರುವ (अभ्यासः 2, ಪುಟಸಂಖ್ಯೆ 44) ವಿಷಯಗಳನ್ನು ಕೇಳಬೇಕು. ಅಲ್ಲದೆ ಇವುಗಳ ಜೊತೆಗೆ ಆ ವಿಷಯಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ ಇನ್ನೂ ಕೆಲವು ಸರಳ ವಿಷಯಗಳ ಬಗ್ಗೆ ಕೇಳಬಹುದು.

ಉತ್ತರವು ಶುದ್ಧ, ಸರಳ ಹಾಗೂ ಸುಲಭ ವಾಕ್ಯಗಳಲ್ಲಿರಬೇಕು. 10 ರಿಂದ 15 ವಾಕ್ಯಗಳಲ್ಲಿರಬೇಕು. ಪ್ರಬಂಧ ಲೇಖನ ಕ್ರಮವನ್ನು ಅನುಸರಿಸಬೇಕು.

2. पत्रमेकं संस्कृतभाषया लिखत — 1 x 5 = 5

ಇಲ್ಲಿ ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿರುವ ಪತ್ರಲೇಖನ ವಿಭಾಗದಲ್ಲಿ ಉದಾಹರಿಸಿರುವ ಮತ್ತು ಅಭ್ಯಾಸದಲ್ಲಿರುವ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬೇಕು. (अभ्यासः 3, ಪುಟ 48)

ಉತ್ತರಿಸುವಾಗ ಪತ್ರಲೇಖನ ಕ್ರಮವನ್ನು ಅನುಸರಿಸಬೇಕು. 3–4 ವಾಕ್ಯಗಳಲ್ಲಿ ವಿಷಯವನ್ನು ಬರೆಯಬೇಕು.

3. द्वयोर्लक्षणं सोदाहरणं मातृभाषया लिखत — 2 x 3 = 6

ಇಲ್ಲಿ अव्ययम्, क्त–क्तवतु प्रत्ययौ, उपसर्गः ಇತ್ಯಾದಿ ವಿಷಯಗಳ ಬಗ್ಗೆ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವು ಕನ್ನಡ ಅಥವಾ ಇಂಗ್ಲೀಷಿನಲ್ಲಿರಬಹುದು. ಉದಾಹರಣೆಯನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಬೇಕು.

4. वाक्यदोषान् समीकुरुत 4 x 1 = 4

ಇಲ್ಲಿ ವಿಭಕ್ತಿಗಳಿಗೆ ಹಾಗೂ ಪುರುಷ ವಚನಗಳಿಗೆ ಸಂಬಂಧಪಟ್ಟಂತೆ ಪ್ರಶ್ನೆಗಳಿರಬೇಕು. ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿರುವ ಉದಾಹರಣೆಗಳನ್ನು ಕೇಳಬೇಕು. ನಾಲ್ಕು ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬೇಕು.

ಉದಾ :— वत्सः धेनुं सह गच्छति

ಉತ್ತರವು ಪೂರ್ಣ ಹಾಗೂ ಶುದ್ಧವಾಕ್ಯದಲ್ಲಿರಬೇಕು.

5. द्वयोः रूपाणि पुरुषत्रये लिखत – 2 x 3 = 6

ಇಲ್ಲಿ ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಧಾತುಗಳ ನಿರ್ದಿಷ್ಟ ಲಕಾರಗಳ ರೂಪಗಳನ್ನು ಕೇಳಬೇಕು.

ಉದಾ :— लोट्, लङ् ಇತ್ಯಾದಿ.

ಉತ್ತರವನ್ನು ಬರೆಯುವಾಗ ಆಯಾ ಲಕಾರದಲ್ಲಿ 9 ರೂಪಗಳನ್ನು ಸ್ಪಷ್ಟವಾಗಿ ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಬೇಕು.

6. वाक्ये योजयत $4 \times 1 = 4$

ಇಲ್ಲಿ ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿ ಅನುವಾದ-ಅಭ್ಯಾಸದಲ್ಲಿ ಉಪಯೋಗಿಸಿರುವ ಪ್ರಸಿದ್ಧ ಪದಗಳನ್ನು ಕೇಳಬೇಕು. ನಾಲ್ಕು ಶಬ್ದಗಳನ್ನು ಕೇಳಬೇಕು.

ಉದಾ:- सह, समीपम्, गत्वा ಇತ್ಯಾದಿ

7. एकं पदं सर्वविभक्तिवचनेषु लिखत— $1 \times 4 = 4$

ಇಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾದ ಅಜಂತ ಹಾಗೂ ಕೆಲವು ಮುಖ್ಯವಾದ ಹಲಂತ ಶಬ್ದಗಳನ್ನು ಕೇಳಬೇಕು.

ಉದಾ : धेनु, भ्रातृ, मातृ, युवन्, पथिन् ಇತ್ಯಾದಿ

ಉತ್ತರವನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಎಲ್ಲಾ ವಿಭಕ್ತಿಗಳ ರೂಪಗಳನ್ನು ಎಲ್ಲ ವಚನಗಳಲ್ಲಿ ಬರೆಯಬೇಕು.

8. वाक्यमेकं विवृणुत— $1 \times 2 = 2$

ಇಲ್ಲಿ सुभाषितम् (ಪುಟ 40) ಎಂಬ ಭಾಗದಲ್ಲಿರುವ ವಾಕ್ಯಗಳಲ್ಲಿ ಯಾವುದಾದರೂ ಎರಡನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವನ್ನು ಕನ್ನಡದಲ್ಲಿ ಅಥವಾ ಇಂಗ್ಲೀಷಿನಲ್ಲಿ 5–6 ವಾಕ್ಯಗಳಲ್ಲಿ ವಿವರಿಸಬೇಕು.

ಉದಾ:- यथाबीजं तथाङ्कुरः ।

9. स्त्रीलिङ्गरूपाणि लिखत — $2 \times 1 = 2$

ಇಲ್ಲಿ ಕೃದಂತ ಶಬ್ದಗಳನ್ನು ಮತ್ತು ವಿಶೇಷಣಗಳನ್ನು ಕೇಳಬೇಕು. ನಾಲ್ಕು ಶಬ್ದಗಳನ್ನು ಕೇಳಿ ಎರಡಕ್ಕೆ ಉತ್ತರಿಸುವಂತೆ ಕೇಳಬೇಕು. ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿರುವ

ಶಬ್ದಗಳನ್ನು ಕೇಳಬೇಕು. ಉತ್ತರಿಸುವಾಗ ಸ್ತ್ರೀಲಿಂಗ ರೂಪವನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಸ್ಪಷ್ಟವಾಗಿ ಬರೆಯಬೇಕು.

ಉದಾ :— ಪ್ರಶ್ನೆ – गतवान्

ಉತ್ತರ : — गतवान् – गतवती

10. एकस्य व्याकरणविशेषं लिखत – 1 x 2 = 2

ಇಲ್ಲಿ ವಿಭಕ್ತಿಗಳಿಗೆ ಸಂಬಂಧಪಟ್ಟ ವ್ಯಾಕರಣ ವಿಶೇಷವನ್ನು ಕೇಳಬೇಕು. ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿರುವುದನ್ನು ಕೇಳಬೇಕು.

ಉದಾ:— देवाय नमः ಇತ್ಯಾದಿ

ಉತ್ತರವನ್ನು ಕನ್ನಡ ಅಥವಾ ಇಂಗ್ಲೀಷಿನಲ್ಲಿ ಬರೆಯಬಹುದು.

11. मातृभाषया अनुवदत 4 x 1 = 4

ಇಲ್ಲಿ ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿರುವ ಅನುವಾದ ಅಭ್ಯಾಸಗಳಲ್ಲಿರುವ ಯಾವುದಾದರೂ ನಾಲ್ಕು ವಾಕ್ಯಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವು ಕನ್ನಡ ಅಥವಾ ಇಂಗ್ಲೀಷಿನಲ್ಲಿರಬೇಕು.

12. संस्कृतभाषया अनुवदत – 5 x 1 = 5

ಇಲ್ಲಿ ಪಾಠ್ಯಪುಸ್ತಕದ ಅನುವಾದ ಅಭ್ಯಾಸದಲ್ಲಿರುವ ಯಾವುದಾದರೂ ಐದು ವಾಕ್ಯಗಳಿಂದ ಕೂಡಿರುವ ಒಂದು ಸಣ್ಣಗದ್ಯಭಾಗವನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಶುದ್ಧವಾಗಿ ಮತ್ತು ಸ್ಪಷ್ಟವಾಗಿ ಬರೆಯಬೇಕು.

ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು–4